# Master of Arts Examination, 2023

(2nd Year, 3rd Semester)

## SANSKRIT

## Course – XI

## [ Sanskrit Prose ]

Time : Two hours — Full Marks : 30

*The figures in the margin indicate full marks.*

**क–विभाग:**

( *चम्पूरामायणम्* )

१। सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्नाः समाधेयाः। 1×5=5

क) शरभङ्गमुनिः केन नाकलोकभजनायामन्त्रितः? केनोपायेन चासौ शाश्वतं पदं प्राप्तवान्?

ख) *अयि* *कवलय* *मामयू* *विमुञ्च* – अस्मिन् वाक्ये रेखाङ्कितसर्वनामपदैः केषां निर्देशः?

ग) *चम्पूरामायणस्य* अरण्यकाण्डस्य आद्ये श्लोके श्रीरामचन्द्रः केन पदेन अभिहितः? स च तत्र केनोपमीयते?

घ) *वामाचारवत् प्रतिभाति वामाचारः* – अत्र वाक्ये द्वितीयवामाचारपदस्यार्थो विव्रियताम्। प्रथमवामाचारशब्दघटकस्य वाम इत्यस्यार्थश्च इष्यते।

ङ) *तदनु शूलमखण्डयदञ्जसा* इत्यादौ श्लोको अखण्डयदिति क्रियायाः कर्ता कः? कस्य कीदृशं शूलमखण्डयदसौ?

च) *यत्र कान्ता न पश्यन्ति क्लान्ता विरहवह्निना* – किं न पश्यन्ति कान्ताः?

छ) *कान्तिं काननचन्द्रिकासमदशं किं निर्ममे निर्ममे* –केन जनेन उच्चारितमिदम्? अस्य वाक्यस्य *निर्ममे* इति क्रियाया: कर्तृपदं यथायथमुल्लेख्यम्। अत्र विशेषणभूतं *निर्ममे* इति पदं कमुद्दिश्य प्रयुक्तम्?

२। सुरगिरा देवनागर्या लिप्या **पदपञ्चकस्य** अर्था देया: – 1×5=5

अहमहमिकया, शूर्पकारातिबाधिता, अक्रूरसत्त्वाम्, प्रत्युटजम्, विस्रगन्धिना, वाडवप्रशस्तम्, वीरपाणवत्।

३। *दुर्गतवर्गं निर्घृणा कदाचिदपि ... नालोकितवती* – का दुर्गतवर्गं नालोकितवती? दुर्गतवर्गस्य वर्णना भोजमनुसृत्य देया। 5

**अथवा**

अधोलिखितश्लोकस्य छन्दोऽलंकारौ निर्णीयेताम् – 1.5+3.5=5

चुलुकगतसमुद्रास्वादने कुम्भयोनेरितरकरनिरस्ता मक्षिकोत्साररीत्या।
गगनगतिविहीना ये घना: पल्वलान्ते विपिनमहिषवेषै: केवलं ते वलन्ते॥

**ख–विभाग:**

**(*हर्षचरितम्*)**

४। सुरगिरा देवनागर्या लिप्या **पञ्च** प्रश्ना: समाधेया:। 1×5=5

क) हरलीला बृहत्कथा च कथं सादृश्यं भजेते?

ख) *कीर्ति: प्रवरसेनस्य* – इत्यादौ श्लोके *प्रवरसेन*-शब्दस्य केऽर्था: संभवन्ति?

ग) आख्यायिकाया: शय्यायाश्च साधर्म्यद्वयमुल्लिख्यताम्।

घ) द्वितीयराज्यवर्धनेन सह प्रभाकरवर्धन: हूणदमनाय कान् प्राहिणोत्?

ङ) शोकाकुले स्कन्धावारे द्रविड आन्ध्रश्च किं कुर्वन्तौ आस्ताम्?



च) यमपट्टिक: वामहस्तेन किं धृतवान् दक्षिणहस्तेन च किम्?

छ) तृतीयं कक्ष्यान्तरं प्रविशन् हर्षदेव: कीदृशं गन्धमनुभूतवान्?

ज) धवलगृहस्थिता: मन्त्रिण: विपश्चित: कञ्चुकी आसन्नसेवकाश्च कीदृशा आसन्?

५। पातयति महापुरुषान्सममेव बहूननादरेणैव।
परिवर्तमान एक: काल: शैलानिवानन्त:॥

— उल्लिखितश्लोकघटकानां पदानां कालपक्षे अनन्तनागपक्षे च वाक्यमात्रमाश्रित्य अन्वय: कार्य:। कस्य वर्णिष्यमानवृत्तान्तस्य सूचकोऽयं श्लोक:? अस्य छन्दोऽलंकारौ उल्लिख्येताम् (नाममात्रमिष्यते, तयोर्विचारो नेष्यते)। 2+2+1

**अथवा**

क आसीत् कुरङ्गक:? तस्य वर्णना उत्प्रेक्षादिवर्जनपूर्वकं कर्तव्या। तद्वर्णनायां बाणस्य कविप्रतिभा कथमुल्लसितेति समासतो विचार्यताम्। .5+2.5+2

६। धवलगृहे मुमूर्षो: प्रभाकरवर्धनस्य शरीरतापशान्तये कीदृशी व्यवस्थाश्रिता? तस्य पथ्यविषये किं ज्ञायते? तस्य देहे दाहज्वरस्य कानि लक्षणानि दृष्टानि? 2.5+1+1.5

**अथवा**

*बाह्यपरिजनेन कथ्यमानकष्टपार्थिवावस्थं राजकुलं विवेश* – बाह्यपरिजनस्य वर्णना बाणभट्टमनुसृत्य देया। 5